| | | | |
|---|---|---|---|
| [1]बन्धा, | बद्धिः, बन्धना, | बिभन्त्सा, | बाबधा ; |
| बन्धनम् , | बन्धनम् , | बिभन्त्सनम् , | बाबधनम् ; |
| बद्ध्वा, | बन्धयित्वा, | बिभन्त्सित्वा, | बाबधित्वा ; |
| अनुबध्य, | प्रबन्ध्य, | प्रबिभन्त्स्य, | प्रबाबध्य ; |

[2]चक्रबन्धं बद्धः, [3]अट्टालिकाबन्धं बद्धः ;

| | | | |
|---|---|---|---|
| बन्धम् २, बद्ध्वा २, | बन्धम् २, बन्धयित्वा २, | बिभन्त्सम् २, बिभन्त्सित्वा २, | बाबधम् २ ; बाबधित्वा २; |

[4]बन्धुः, [5]बधिरः, [6]ब्रध्नः-बुध्नः, [7]बन्धुरः, [8]बन्धूकः ।

## (1099) " बर्ब गतौ " (I-भ्वादिः-418. सक. सेट्. पर.)

'अयं बन्ब इति नोपधः । इति कौशिकः ।' इति मा. धा. वृत्तिः । बर्बकः-र्बिका, बर्बकः-र्बिका, बिबर्बिषकः-षिका, बाबर्बकः-र्बिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्बतिवत् (173) ज्ञेयानि । [9]बर्बरः-बर्बरी, [A]प्रबर्ब्य ।

---

1. धातोः संयोगान्तत्वेन गुरुत्वात्, 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये रूपमेवम् । क्तिनि विवक्षिते तु कित्त्वेनोपधानकारलोपे बद्धिः इत्यपि साधुरिति ज्ञेयम् ।
2. 'अधिकरणे बन्धः' (3-4-41) इति णमुल् । चक्रे बद्ध इत्यर्थः । कषादित्वात् यथाविध्यनुप्रयोगः ।
3. 'संज्ञायाम्' (3-4-42) इति णमुल् । अट्टालिकाबन्ध इति बन्धविशेषस्य संज्ञा । एवं क्रौञ्चबन्धं बद्धः, पद्मबन्धं बद्धः, शरबन्धं बद्धः, इत्यादिषु सर्वत्र णमुलुपपत्तिर्ज्ञेया । अत्र सर्वत्र बन्धः इत्यनेन व्यूहविशेषस्य, काव्यगतस्य बन्धविशेषस्य च तन्त्रेण ग्रहणमिति ज्ञेयम् ।
4. औणादिके [द. उ. 1.95] उप्रत्यये रूपमेवम् ।
5. औणादिके [द. उ. 8.26] किरच्प्रत्यये, प्रत्ययस्य कित्त्वेनोपधानकारलोपे च रूपमेवम् । बद्धमस्य श्रवणेन्द्रियमिति बधिरः = श्रोत्रेन्द्रियहीनः ।
6. 'बन्धेर्ब्रधिबुधि च' (द. उ. 5-38) इति नक्प्रत्यये ब्रधि-बुधि-इत्यादेशयोश्च रूपे सिद्ध्यतः । कित्त्वादुपधानकारलोपः । ब्रध्नः=सूर्यः । बुध्नः = सङ्कल्पो मनः, देवो वा ।
7. बाहुलकादौणादिके उरच्प्रत्यये रूपम् । 'बन्धूर बन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु ।' इति रन्तिदेववचनाद् दीर्घमध्यमोऽप्यस्तीति विज्ञायते ।
8. औणादिके (द.उ. 3-46) ऊकप्रत्यये रूपम् । बन्धूकम्=पुष्पविशेषः ।
9. बाहुलकादौणादिकेऽरप्रत्यये रूपम् । बर्बरः= शिथिलः, प्राणिविशेषश्च । स्त्रियां ङीषि [बर्बरी इति ।

A. 'प्रबर्ब्य शैलानुपमर्ब्य पद्मिनीं प्रकर्ब्य चाशाः श्रमशोणितैरिव ॥' धा. का.1.54.